०.५० छंदा इंद्रो गायत्री ॥ इंद्रावाहने वि० ॥ ॐ इंद्रं वो विश्वत० भूर्भुवः स्वः इंद्रेहागछेह
॥३॥ तिष्ठ भुक्तदक्षिणपार्श्वे इंद्राय० ॥६॥ यमाय सोमं वैवस्वतो यमो यमोनुष्टुप् ॥ य
मावाहने वि० ॥ ॐ यमाय सोमं सुनु० ॥ भूर्भुवः स्वः यमेहागछेह तिष्ठ शनिदक्षिण
पार्श्वे यमाय० ॥७॥ मोषुणो घोरः कण्वः कालो गायत्री ॥ कालावाहने वि० ॥ ॐ मो
१ षुणः पराय० ॥ भूर्भुवः स्वः कालेहागछेह तिष्ठ राहुदक्षिणपार्श्वे कालाय० ॥८॥
उषो वाजं प्रस्कण्वश्चित्रगुप्तो बृहती ॥ चित्रगुप्तावाहने विनि० ॥ ॐ उषो वाजं हि वं०
भूर्भुवः स्वः चित्रगुप्तेहागछेह तिष्ठ केतुदक्षिणपार्श्वे केतवे० ॥९॥ एवमेवं शुक्ला
श्चैतैः ग्रहाणां वामे मंत्रांते व्याहृति रिहागछेह तिष्ठेति चोक्त्वा प्रत्यधिदेवतास्था
पयेत् ॥ अग्निं दूतं काण्वो मेधातिथिरग्निर्गायत्री ॥ अग्न्यावाहने वि० ॥ ॐ अ संमू
ग्निं दूतं वृणीम० ॥ भूर्भुवः स्वः अग्नेहागछेह तिष्ठ सूर्यवामपार्श्वे अग्नये० ॥१॥ ॥२

दिमुखाः अधिदेवताः श्वेतपुष्पाक्षतैः क्रमात्सूर्यादीनां दक्षिणतः स्थाप्य॥ ॥त्र्यंब
कं वसिष्ठो रुद्रोनुष्टुप्॥ रुद्रावाहने वि०॥ ॐ त्र्यंबकं यजाम०॥ भूर्भुवः स्वः ईश्वरेहा
गच्छेह तिष्ठ सूर्य दक्षिणपार्श्वे ईश्वराय०॥१॥ गौरीर्मिमाय दीर्घतमा उमा जगती॥
उमावाहने वि०॥ ॐ गौरीर्मिमाय सलि०॥ भूर्भुवस्स्वः उमेहागच्छेह तिष्ठ सोम दक्षिण
पार्श्वे उमायै०॥२॥ यदक्रंद ओचथ्यो दीर्घतमास्कंदस्त्रिष्टुप्॥ स्कंदावाहने वि०
॥ ॐ यदक्रंदः प्रथमं जा०॥ भूर्भुवस्वः स्कंदेहागच्छेह तिष्ठ भौम दक्षिणपार्श्वे स्कंदाय०
॥३॥ विष्णोर्नुकं दीर्घतमा नारायणस्त्रिष्टुप्॥ नारायणावाहने वि०॥ ॐ विष्णोर्नुकं
वीर्याणि प्र०॥ भूर्भुवस्स्वः नारायणेहागच्छेह तिष्ठ बुध दक्षिणपार्श्वे नारायणाय०॥
॥४॥ ब्रह्मजज्ञानं गौतमो वामदेवो ब्रह्मा त्रिष्टुप्॥ ब्रह्मावाहने वि०॥ ॐ ब्रह्मजज्ञानं प्र०
॥ भूर्भुवः स्वः ब्रह्मन्निहागच्छेह तिष्ठ गुरु दक्षिणपार्श्वे ब्रह्मणे०॥५॥ इंद्रं वो मधुछ

त

आयंगौः सार्पराज्ञी सर्पा गायत्री ॥ सर्पावाहने वि० ॥ ॐ आयंगौः पृश्निरक्रमीदस० ॥
ह० तः भूर्भुवः स्वः सर्पाः इहागच्छत इह तिष्ठत सर्पेभ्यो० सर्पानावाहयामि ॥ ८ ॥ ब्रह्मजज्ञानं गौ
तमो वामदेवो ब्रह्मा त्रिष्टुप् ॥ ब्रह्मावाहने वि० ॥ ॐ ब्रह्मजज्ञानं प्रथमं० ॥ भूर्भुवः स्वः
ब्रह्मन्निहागच्छ इह तिष्ठ ब्रह्मणे० ॥ ९ ॥ ततः ॥ शुक्लपुष्पाक्षतैः ॥ विनायकादिपंच ॥ ॥
गणानां त्वा शौनको गृत्समदो गणपतिर्जगती ॥ गणपत्यावाहने वि० ॥ ॐ गणानां त्वा
२ गणप० ॥ भूर्भुवः स्वः गणपते इहागच्छ इह तिष्ठ गणपतये० ॥ १ ॥ जातवेदसे मारीचः क
श्यपो दुर्गा त्रिष्टुप् ॥ दुर्गावाहने वि० ॥ ॐ जातवेदसे सुन० ॥ भूर्भुवः स्वः शानिरू
भरतौ दुर्गायै० दुर्गा आ० ॥ २ ॥ तव वायो व्यश्वांगिरसो वायुर्गायत्री ॥ वाय्वावाने
र्भुवः स्व वि० ॥ ॐ तव वायवृत स्पते० ॥ ई वेरुत्तरतो वायुमावाहयामि ॥ ३ ॥ एतान्मंत्रान् प सं भू
ठंति सांप्रदायिकाः ॥ तन्त्रके शुचिन्मंत्रेषु मूलं चिंसा ॥ ४ ॥ आदिः सत्तवत्स आकाशे ॥ ४ ॥

न

अप्सु मे मे धाति थिरापो नुष्टुप् ॥ अपावाहने वि० ॥ ॐ अप्सु मे सोमो अब्रवी० ॥ षजी: ॥ भूर्भु
वः स्वः अपः इहागच्छेह तिष्ठ अङ्भ्यो नमः अपः आवाहयामि ॥ ३ ॥ स्योना पृथिवी का
ण्वो मे धाति थिर्भूमिर्गायत्री ॥ भूम्यावाहने वि० ॥ ॐ स्योना पृथिवि भवा० ॥ भूर्भुवः
स्वः भूमेहागच्छेह तिष्ठ भूम्यै० ॥ ४ ॥ इदं विष्णुः काण्वो मे धाति र्विष्णुर्गायत्री ॥ विष्णवा थि
वाहने वि० ॥ ॐ इदं विष्णु र्विचक्र० ॥ भूर्भुवः स्वः विष्णो इहागच्छेह तिष्ठ विष्णवे० ॥ ५ ॥
इंद्र श्रेष्ठानि ग० त्समदइंद्रस्त्रिष्टुप् ॥ इंद्रावाहने वि० ॥ ॐ इंद्र श्रेष्ठानि द्रविणानि० ॥
भूर्भुवः स्वः इंद्रेहागच्छेह तिष्ठ इंद्राय० ॥ ६ ॥ इंद्राणीमासु ष्वाकपि रिंद्राणी पंक्तिः ॥ इं
द्राण्यावाहने वि० ॥ ॐ इंद्राणीमासु नारिषु० ॥ भूर्भुवः स्वः इंद्राणी हागच्छेह तिष्ठ इं
द्राण्यै० ॥ ७ ॥ प्रजापते हिरण्यगर्भः प्रजापति स्त्रिष्टुप् ॥ प्रजापत्यावाहने वि० ॥ ८
ॐ प्रजापते न त्वदेतान्य० ॥ भूर्भुवः स्वः प्रजापते हागच्छेह तिष्ठ प्रजापतये० ॥ ७ ॥

०५- भुर्वः स्वः इन्द्र इहागच्छ इह तिष्ठ इन्द्राय० ॥१॥ अग्निं दूतं काण्वो मेधातिथिरग्निर्गा
५॥ यत्री ॥ अग्न्यावाहने वि० ॥ ॐ अग्निं दूतं वृणीमहे० ॥ भूर्भुवः स्वः अग्ने इहागच्छ इह ति
ष्ठ अग्नये० ॥२॥ यमाय सोमं वैवस्वतो यमो यमोऽनुष्टुप् ॥ यमावाहने वि० ॥ ॐ यमाय सोमं
सुनुत० ॥ भूर्भुवः स्वः यमेहागच्छ इह तिष्ठ दक्षिणे यमाय० ॥३॥ मोषुणो घोरः कण्वो नि
ऋतिर्गायत्री ॥ निरृत्यावाहने वि० ॥ ॐ मोषुणः परापरा० ॥ भूर्भुवः स्वः निरृत इहागच्छ
इह तिष्ठ निरृतये नमः नि० ॥४॥ त्वं नो अग्ने शुनःशेपो वरुणस्त्रिष्टुप् ॥ वरुणावाहने
3 वि० ॥ ॐ त्वं नो अग्ने वरुणस्य वि० ॥ भूर्भुवः स्वः वरुण इहागच्छ इह तिष्ठ वरुणाय० ॥५॥
तव वायो व्यश्वाङ्गिरसो वायुर्गायत्री ॥ वाय्वावाहने वि० ॥ ॐ तव वायवृतस्पते० ॥
भूर्भुवः स्वः वायो इहागच्छ इह तिष्ठ वायवे० ॥६॥ सोमो धेनुं गोतमः सोमस्त्रिष्टुप् ॥ऽ रां भू
सोमावाहने वि० ॥ ॐ सोमो धेनुं सोमो अर्वन्तमाशुं० ॥ भूर्भुवः स्वः सोमेहागच्छ इह ति ॥७॥

गायत्री॥आकाशावाहने वि०॥ॐ आदित्सप्रत्नस्य रेतसो०॥ राहो दक्षिणत आकाशाय०॥
आकाशं आ०॥४॥ एषो उषा प्रस्कंण्वो अश्विनौ गायत्री॥अश्विनयावाहने वि०॥ॐ ए
षो उषा अपूर्व्यो०॥भूर्भुवस्स्वः अश्विनौ इहागच्छतं इह तिष्ठतं केतोर्दक्षिणे अश्विभ्यां
नमः अश्विनौ आवाहयामि॥५॥तानि विनायकादिस्थानानि चिंतामणौ॥विनायका
दीन् पंच उल्लरत सांप्रदायकः॥एवं द्वात्रिंशद्देवताः प्रतिरूप नारायणादयः॥क्षेत्रस्य वा
मदेवः क्षेत्राधिपतिरनुष्टुप्॥क्षेत्रपालावाहने वि०॥ॐ क्षेत्रस्य पतिना वयं०॥भूर्भुवःस्वः
क्षेत्रपाले इहागच्छतं इह तिष्ठतं क्षेत्रपालाय नमः क्षेत्रपालं आवा०॥६॥वास्तोष्पते मैत्रावरुणिर्व
सिष्ठो वास्तोष्पतिस्त्रिष्टुप्॥वास्तोष्पत्यावाहने वि०॥ॐ वास्तोष्पते प्रति०॥भूर्भुवस्स्वः
वास्तोष्पष्पते इहागच्छतं इह तिष्ठतं वास्तोष्पतये० वास्तोष्पतिं आ०॥७॥तद्यथा॥
इंद्र विभ्राजेतामाधुछंदस इंद्रोनुष्टुप्॥इंद्रावाहने वि०॥ॐ इंद्रं विश्वा अवीवृ०॥भू

नव॰ग॰
॥६॥

यतः कामफलप्रदाः॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव॥ सांनिध्यं कुरु मे देव प्रसंनो भ-
व सर्वदा॥ ॥अथ नवग्रहध्यानं॥ पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः॥ सप्ताश्वरथसं-
युक्तो द्विभुजः स्यात्सदा रविः॥१॥ श्वेतः श्वेतांबरधरो दशाश्वः श्वेतभूषणः॥ गदापाणिर्द्विबा-
हुश्च कर्तव्यो वरदः शशी॥२॥ रक्तमाल्यांबरधरः शक्तिशूलगदाधरः॥ चतुर्भुजो मेषगमो
वरदः स्याद्धरासुतः॥३॥ पीतमाल्यांबरधरः कर्णिकारसमद्युतिः॥ खड्गचर्मधरः पाणिः
सिंहस्थो वरदो बुधः॥४॥ देवदैत्यौ गुरू तद्वत्पीतश्वेतौ चतुर्भुजौ॥ दंडिनौ वरदौ कार्यौ सा-
क्षसूत्रकमंडलुः॥५॥ इंद्रनीलद्युतिः शूली वरदो गृध्रवाहनः॥ बाणबाणासनधरः
कर्तव्योऽर्कसुतः सदा॥६॥ करालवदनः खड्गचर्मशूली वरप्रदः॥ नीलसिंहासनस्थश्च
राहुरत्र प्रशस्यते॥७॥ धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः॥ गृध्रासनगता नित्यं
केतवः स्युर्वरप्रदाः॥८॥ सर्वे किरीटिनः कार्या ग्रहा लोकहितावहाः॥ अंगुलेनोच्छ्रिताः स- संमू
॥६॥

५

ष्ठ सोमाय नमः सोममावाहयामि ॥ ७ ॥ तमीशानं गौतमो वामदेव ईशानो जगती ॥
ईशानावाहने वि० ॥ ॐ तमीशानंजगतस्तस्थुषस्पतिं० ॥ भूर्भुवः स्वः ईशानेहागच्छ
इहतिष्ठ ईशानाय नमः ईशानं आवाहयामि ॥ ८ ॥ ततो वेदीशान्यां कलशं संस्थाप्य ॥
तत्र वरुणं आवाह्य ॥ संपूज्य मिमं मंत्रयेत् ॥ तद्यथा ॥ कलशस्य मुखे विष्णुः ॥ ० ॥
आयांतु यजमानस्य दु० ॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥ आयांतु
यजमानस्य दुरितक्षयकारकाः ॥ देवदानवसंवादे मथ्यमाने महोदधौ ॥ उत्पन्नो
सि तदा कुंभ विधृतो विष्णुना स्वयं ॥ त्वत्तोयि सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः
॥ त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च
प्रजापतिः ॥ आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठंति सर्वेपि

वैशतमष्टोत्तरं सदा ॥ ततः षोडशोपचारैः पूजयेत् ॥ अन्वाधानं ॥ आदित्यं ॥ सोमं ॥ भौमं ॥
बुधं ॥ बृहस्पतिं ॥ शुक्रं ॥ शनिं ॥ राहुं ॥ केतुं ॥ एताः प्रधानदेवताः अर्कादियथालाभसमि
च्चर्वाज्याहुतिभिः प्रतिद्रव्यं प्रत्येकं अमुकसंख्याकाभिः ॥ ईश्वरं ॥ उमां ॥ स्कंदं ॥ नारायणं ॥
ब्रह्माणं ॥ इंद्रं ॥ यमं ॥ कालं ॥ चित्रगुप्तं ॥ अग्निं ॥ अपः ॥ भूमिं ॥ विष्णुं ॥ इंद्रं ॥ इंद्राणीं ॥ प्र 9
5 जापतिं सर्पान् ॥ ब्रह्माणं ॥ एताः अधिदेवताः प्रत्यधिदेवताश्च अर्कादियथालाभस
मिच्चर्वाज्याहुतिभिः ॥ प्रतिद्रव्यं ॥ प्रत्येकं ॥ अमुकसंख्याकाभिः ॥ गणपतिं ॥ दुर्गां ॥ वा
युं ॥ आकाशं ॥ अश्विनौ ॥ वास्तोष्पतिं ॥ क्षेत्रपालं ॥ इंद्रं ॥ अग्निं ॥ यमं ॥ निर्ऋतिं ॥ वरु
णं ॥ वायुं ॥ सोमं ॥ ईशानं ॥ विनायकादिक्रतुसंरक्षदेवताः इंद्रादिदेवताश्च समिच्चर्वा
ज्याहुतिभिः ॥ प्रतिद्रव्यं ॥ प्रत्येकं ॥ अष्टाष्टसंख्याकाभिः ॥

तत्रहिपक्षोघटादिः॥तथाचघटावृत्तित्वावच्छिन्नाभाववद्घटावृत्तित्वावच्छिन्नाभावा
दिघटितसाध्याभावस्याधिकरणाप्रसिद्ध्यापृथिवीत्वाभाववान्जलत्वादित्या
दावव्याप्तिः॥घटावृत्तित्वावच्छिन्नाभावप्रतियोगितायाःघटत्वादावपिसत्त्वेन
साध्यतावच्छेदकस्यतद्व्यापकतयातादृशाभावानांलक्षणाघटकत्वात्॥प्रति
योगिभेदेचएकधर्मावच्छिन्नप्रतियोगितायाएकत्वादितिभावः॥सद्धेतुवृत्ति।
6 नाव्याप्तिरित्यन्वयः॥वह्निमान्धूमादित्यत्रसाध्यतावच्छेदकसंयोगसंबंधे
नविपक्षीभूतत्वेजलत्वाघवृत्तित्वावच्छिन्नाभावेघटस्यगुणादौद्रव्यंपृथिवी
त्वादित्यत्रचविपक्षीभूतरूपरसादिप्रत्येकासमवेतसामान्याभावकूटस्य
जात्याद्यवधिकरणतासत्त्वात्तदप्रसिद्धिनिबंधनाव्याप्तिरूपस्यैवविरहात्

उभयंनोपलद्धते॥नन्वेतावतामेकाधिकरणंतावत्तस्तुदायस्यविवक्षायांनोक्तव्याप्ति
२ रतआह॥पृथिवीत्वादिति॥साधनसमानाधिकरणत्वेनसाध्याभावस्य
विशेषणीयत्वेजातित्वावच्छिन्नाभावमादायनातिव्याप्तिसंभवइत्यादिपदस्तु
पात्तं॥तथाचजलत्वासमवेतत्वावच्छिन्नाभावस्यतेजोऽसमवेतत्वावच्छिन्ना
भावमादायचसाधनसमानाधिकरणत्वोत्तरभयघटितसाध्याभावस्याधि
करणेऽप्यादोप्रवृत्तहेतोरसत्त्वादतिव्याप्तिरितिभावः॥द्रव्यत्वस्यसमवा
येनहेतुत्वेतादृशाभावकूटवतिऽप्यादोहेतुतावच्छेदकीभूतसमवायसं ॥९२॥
बंधेनास्यप्रसिध्येवनातिव्याप्तिरतउक्तंद्रव्यत्वप्रकारकेति॥सामान्या
दोचस्वरूपसंबंधेनवृत्तिर्न्नव्यवादवेवस्तुतस्मा॥प्रमा॥विशेष्यत्वाद

यभिन्नादिभिन्नसमवायिभेदाभावकूटाधिकरणं अभाव एव तन्निरूपितसाध्यतावच्छेदकसमवायादिसंबंधेन दोषसमवधास...
न्यदन्यत्वप्रकारकप्रमाविशेष्यत्वपर्यन्तानुधावनेनमिति ध्येयं॥

वृत्ति॥ नास्तिव्याप्तिरित्यन्वयः॥ तादृशप्रतीतिविषयत्वेन्यसमस्तादृक्प्रमात्वादवच्छिन्नस्यतः॥
प्रमेति॥ अत्रप्रतियोगिताव्यापकत्वं साध्यतावच्छेदकतावच्छेदकसंबंधेनग्राह्यं॥
तेननित्यज्ञानवत्त्वादात्म्येनसाध्यतायामीश्वरत्वादिहेतौघटान्यभेदस्यघटान्य
भेदस्य वृत्तयोर्विषयतासंबंधेनप्रतियोगिताव्यापकत्वेऽपिनित्यज्ञानकयोरैक्याधिकरणा
प्रसिद्धावपिनाव्याप्तिः॥ नचात्मत्वादिहेतौएवंसाध्ये तत्प्रकारकप्रमाविषयत्वादि
मत्त्वपृथिव्यादौसाध्यनसमानाधिकरणस्यतत्पृथिव्यादिनिष्ठद्रव्याणांप्रत्येकभिन्न
भेदकूटस्याधिकरणत्वगुणादौहेतौरसत्वेऽव्याप्तिः॥ नचैवंवह्निरूप[illegible]तेमोम
यत्वान्तरूपमादिसत्त्वाव्याप्तिः॥ प्रतियोगितासामान्यस्येवप्रत्येकपर्यवसितत्वेनतां
प्रतियोगितास्वरूपसाध्यतावच्छेदकतावच्छेदकसंबंधेनकस्याप्यभावकत्वयानि

7

९३ रुकेसाध्याभावाप्रसिद्धेरितिवाच्यं॥ एकविशिष्टापरत्वाभावातिरिक्तस्योभयत्वस्यसा
र्वभौममलेपयाप्तिभिन्नसंबंधेनैवसाध्यतावच्छेदकत्वादितिभावः॥ साध्यताव
च्छेदकव्यापकप्रतियोगिताकेत्यस्यफलमाह॥ नापीति। घटत्वाभाववत्त्वेनसाध्य
त्वेसाध्याभावकूटवत्वंघटस्यैववस्तुत्वमसत्तत्त्वमभाववत्वादिनेति॥ आदिनाप्र
मेयत्वादेरुपग्रहः॥ तथाचाभाववान्प्रमेयवान्वा घटत्वादित्यत्रसाध्यनसमा
नाधिकरणस्यतत्तद्घटान्यत्वाभावकूटस्याधिकरणाप्रसिद्ध्याऽव्याप्तिःस्यादत
उक्तंसाध्यतावच्छेदकव्यापिकेति॥ साध्यतावच्छेदकव्यापकप्रतियोगिताकत्वा ॥९३॥
भावादेवतत्तद्घटान्यत्वाभावानांलक्षणाघटकत्वमितिभावः॥ अत्रस्वान्यूनव
त्तिधर्मावच्छिन्नायाएवप्रतियोगितायाःसाध्यतावच्छेदकसमनैयत्यंवाच्यं॥

तेन घटत्वाभावत्वेन चघटाभावाभावप्रमेयसामान्याभावयोरेकाधिकरणाप्रसिद्धावपि
नोक्ताव्याप्तितादवस्थ्यं॥ घटत्वाभावत्वादेः प्रमेयसामान्यनिष्ठप्रतियोगितान्यूनवृत्ति
त्वेन तादृशप्रतियोगिताकाभावानां लक्षणघटकत्वात्॥ एवं साध्यसामानाधिकरण्य
मपि हेतौ वक्तव्यं॥ तेन सत्तावत्समवेतत्वत्वस्य समनियतप्रतियोगिताकस्य व्याधिकरण
धर्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वात्तादृशस्य च यावत्त्व एव हेतौ सत्त्वेपि सत्ताभा
8
ववान्द्रव्यत्वादित्यादिविरुद्धहेतौ नातिव्याप्तिरिति ध्येयं॥ यद्यपि घटवृत्तित्वविशिष्टद्र
व्यत्वाद्यभावस्य पटान्यवृत्तित्वविशिष्टद्रव्यत्वाद्यभावस्य च द्वयोरेकाधिकरणाप्र
सिद्ध्या वाच्यं ज्ञेयत्वादिसाध्येऽव्याप्तिः॥ न च घटादिवृत्तित्वविशिष्टद्रव्यत्वत्वेन प्रतियो
गितावच्छेदकं॥ तदपेक्षया लघोर्घटादिवृत्तित्ववैशिष्ट्यस्यैव न्याय्यत्वात्तादृशविशिष्ट

त्वावच्छिन्नाभावानां च साध्यतावच्छेदकसमनियतप्रतियोगिकत्वाभावादेवसुदासः॥१॥
४ घटवृत्तित्वविशिष्टवस्तुमात्रस्यैव प्रतियोगितासत्त्वादिति वाच्यं॥ वाच्यत्वनिष्ठा यो यत्
त्वाविशेषेण घटावच्छिन्नप्रतियोगिताकाभावस्य तादृशासंभवेन घटान्यावच्छिन्न
प्रतियोगिताकाभावस्य च द्वयोस्तथापि अधिकरणाप्रसिद्ध्याऽव्याप्तितादवस्थ्या
त्॥ न च येयत्ताविशेषेण घटादेः प्रतियोगितावच्छेदकत्वे सामान्याभाव इति वाच्यं॥ तस्य
त्वेयाप्यवश्यं वाच्यत्वात्॥ अन्यथा घटवृत्तित्वविशिष्टवाच्यत्ववान्ज्ञेयत्वादित्यादा
वतिव्याप्त्यापत्तेः॥ उक्तलक्षणघटकतादृशवाच्यत्वत्वावच्छिन्नाभावस्याप्रसिद्ध्या घटवृत्तित्व
विशिष्टत्वावच्छिन्नाभावस्य च साध्यतावच्छेदकसमनियतप्रतियोगिकत्वाभावेन ॥८५॥
वधिकरणधर्मावच्छिन्नस्येव घटवृत्तित्वविशिष्टवाच्यत्वाभावस्य लक्षणघ

ट्कत्वात्॥ तथापि दूषणमिदं स्फुटत्वयोपेक्ष्याह॥ द्रव्यत्व पृथिवीत्वेति॥ ननु सार्वभौममते
विरुद्धयोरुभयत्वस्यातिरिक्तत्वेपि समानाधिकरणयोरेकविशिष्टापरत्वमेवोभयत्वं तथा
च पृ[thi]थिवीत्वद्रव्यत्वोभयत्वमपि पृथिवीत्वविशिष्टद्रव्यत्वत्वमेव साध्यतावच्छेदकी
भूतपर्यवसितमिति तत्र समनियतप्रतियोगिताकत्वाभावादेवतदुभयान्यत्वरत्वावच्छि
न्नाभावसाध्यनातिव्याप्तिः॥ तत्प्रतियोगितायाः पृथिवीत्वेपि सत्वेन निरुक्तसाध्यताव
9
च्छेदकस्यतद्व्यापकत्वादित्यत आह॥ अपि चेति॥ उद्देश्यविधेयभावस्य तेसमानलिंग
कत्वस्यानंगत्वात्॥ पृथिव्यामन्यत्वविशिष्टद्रव्यत्वस्य साध्यताभ्रमं निराकर्तुं पक्षमु
छिरवति॥ इदमिति॥ पृथिवीति॥ पृथिव्यन्यत्वे सतिद्रव्या न्यासमवेतसत्त्वद्रव्यसमवेत
वदित्यर्थः॥ नच सत्त्वद्रव्यवृत्तित्वोत्तमो वेन द्रव्यत्वस्य साध्यत्वे द्रव्यान्यासमवेतत्वोव

९५ च्छिन्नाभावस्य तादृशसाध्यतावच्छेदकसमनियतप्रतियोगिताकत्वाभावात्॥ गुरुतरसङ्क
लद्रव्यवृत्तित्वघटितद्रव्यत्वत्वावच्छिन्नात्यन्ताभावस्य चाप्रसिद्धत्वाद्गुणे द्रव्यत्वत्वावच्छिन्ना
भावसाध्यकातिव्याप्तेरसंगत्यापत्तेरिति वा। द्रव्यत्वत्वादिस्तत्र द्रव्यत्वपदेन द्रव्यभिन्नत्वा
कारकतद्वृत्तिप्रकारत्व[illegible]त्वस्यैवाग्रे वक्ष्यमाणत्वात् तस्य च द्रव्यान्यासमवेतत्वमपेक्ष्य लघु
त्वेन प्रतियोगितावच्छेदकत्वसंभवादिति भावः॥ द्रव्यत्वत्वादीति॥ आदिना पृथिवीत्वत्व
विशिष्टद्रव्यत्वत्वस्य पृथिवीवृत्तिविशिष्टद्रव्यत्वत्वस्य च योरवच्छेदकयोः परिग्रहः॥ न
नु साध्यतावच्छेदकान्यसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभाव एव सा
ध्याभावपदार्थो वाच्यः॥ तथा च विशिष्टद्रव्यत्वत्वस्य साध्यतायां द्रव्यत्वसामान्याभाव ॥९५॥
स्यालभ्यत्वान्नातिप्रसंगः॥ गुरुतरधर्मस्य प्रतियोगितावच्छेदकत्वोपगमसाध्यतायां द्रव्ये

णासाध्यतायामपि नातिव्याप्तिः॥ इत्यत आह॥ किं चेति॥ ननु विशिष्टस्यातिरिक्तत्वमते
द्रव्यत्वादिसामान्याभावस्य विशिष्टसाध्यतावच्छेदकसमनियतप्रतियोगिताक
त्वाभावाद्द्वित्वमादाय नातिव्याप्तिरत आह॥ किं चेति तु प्राचः॥ सद्धेतौ॥ द्रव्यत्वादौ।
अप्रसिद्धेरिति॥ कालिकस्य सकलरूपत्वेपि साध्यवत्ताविरोधिताघटकसंबंधेन सम
वायेन तदनधिकरणत्वादिति भावः॥ शंकते॥ यावतामिति॥ तथा च व्यधिकरण
धर्मावच्छिन्नसाध्याभावैरैकाधिकरण्यापन्नस्य तत्तद्रूपस्याधिकरणे वृत्तित्वप्र
सिद्ध्यैव नाव्याप्तिरिति भावः॥ विवक्षितेपीत्यपि नातादृशाविवक्षायामपि वक्ष्यमा
णाऽतिव्याप्तिः सूचिता॥ ननु यावतां मिथः सामानाधिकरण्यं तावत्सत्तु तद्यो विव
क्षितः॥ किं वा यावतां साध्याभावानामितरेण सामानाधिकरण्यं तावत्सत्तु तद्यो मिप्रे

तः॥ प्रथमे॥ रूपसिध्यादि॥ अभेदमिति॥ पृथिव्याः विशेषणतो॥ ननु पक्षानिर्देशः॥ तथास
१६ ति घटत्वाद्यवच्छिन्नपटत्वाद्यवच्छिन्नकम्पत्वाद्यवच्छिन्नादीनामेव लक्षणयोर्मिथः सा
मानाधिकरण्यापन्नसाध्याभावानां अधिकरणे लक्षणयोरतिव्याप्तेः देवेवाद्युत्वादि
हेतावतिव्याप्त्यनुपपत्तेः॥ एतेन पृथिवीसमवेतप्रतियोगिकाभावस्य साध्यत्वे
घटत्वादेः सद्धेतुत्वात्॥ समवेतत्वापेक्षयाऽनुगतत्वमेतत् पृथिवीसमवेतत्वाव
च्छिन्नाभावस्य वाप्रसिद्धेर्वसाध्यत्वायोगात् स्वरूपदं॥ ननु एतेन पृथिवीवृत्तिद्र
व्यत्वावच्छिन्नाभावस्य साध्यकस्य पृथिवीत्वादिकं सद्धेतुरेव॥ प्रलये परमाणौ उत्प ॥९६॥
त्तिकाले घटादिविनाशयोगात् स्वरूपत्वात्॥ अतः साध्यान्तरमाह॥ तन्मे त्येति॥ अ
त्र पृथिवीपदमेतत्पृथिवीपरं॥ अन्यथाप्रसिद्धेः वृत्तित्वघटितानां लक्षणयोर्मिथः सा

मानाधिकरण्यापन्नसाध्याभाववत्पावायुत्वादेस्तत्त्वरूपाधिकरणीभूतवायुवृत्ति
त्वेनैवातिव्याप्तेरसंभवापत्तेरिति ध्येयं ॥ अत्रापि एतत्पृथिवीसमवेतप्रतियोगिका
भावस्य केवलान्वयित्वात्तत्र साध्ये वायुत्वादेः सद्धेतुत्वात्पृथिवीसमवेतत्वावच्छिन्नाभा
वस्य चाप्रसिद्ध्या साध्यतायोगात्सत्तेत्यपदं ॥ न च सत्तात्वेनैतत्पृथिवीसमवेतत्वाव
च्छिन्नाभावोऽप्रसिद्धः ॥ द्रव्यत्वत्वस्यैवानवच्छेदकत्वादिति वाच्यं ॥ सकलद्रव्यवृत्ति
त्वादिघटितस्य द्रव्यत्वत्वस्यैव तादृशासमवेतत्वोपेक्षया गुरुत्वेनाऽनवच्छेदकत्वादिति ।
सत्तात्वसमवेतत्वावच्छिन्नाभावस्याप्रसिद्धत्वात् समवेतत्वावच्छिन्नाभावस्य
साध्यत्वे च समवेतमात्रस्यैव तद्भाववत्त्वाभिधः सामानाधिकरण्यापन्नसमवेतत्वरूप
वत्तिवायोर्हेतोः सत्त्वादेव नातिव्याप्तिरतः पृथिवीपदं ॥ न तु वायुत्वस्य तु रूपसाध्य सा

मानाधिकरण्याभावादेव न तत्रातिव्याप्तिरतो हेत्वंतरमाह॥ रूपवदिति॥ अयं तु हेतुर्गुणा
९७ दौ साध्यसमानाधिकरणः रूपात्यंताभावस्य पृथिव्यांउत्पत्तिकालावच्छेदेन सत्वात्तत्रा
तिव्याप्त्यसंभवात्॥ रूपवद्न्यत्वानुधावनं॥ रूपवद्भेदस्यापि तदानींपृथिव्यांस्त्वपगमे
त्याह॥ इत्यादाविति॥ आदिनावायुरूपान्यतरत्वादेः परिग्रहः॥ तादृशेति॥ मिथः सा
मानाधिकरणपापन्नेत्यर्थः॥ धूलीपैलाह॥ वस्तुतइति॥ तादृशाभावेति॥ व्यधिकरण
धर्मावच्छिन्नेसाध्याभावेत्यर्थः॥ सहस्रतेत्यवच्छेदकभेदेनाभावभेदस्यानुपेत्योक्तं॥ दुर्व
हेवेति॥ ननु यावतामेकव्यक्तिवृत्तित्वं तावत्समुदायस्याधिकरणोत्यानाप्रसिद्धेः॥ ॥६७॥
तथाप्यस्तु काद्रिति व्याप्तिः॥ किंच सत्तान्यत्वपृथिवीसमवेतत्वान्यत्वस्याभावो द्रव्य
त्वेमेवं॥ गोपवान्नत्तु सत्तान्यत्वपृथिवीसमवेतमात्रं॥ वह्निनीलधातुवेगोरवादतः
तथा तथा दृशा कृटत्वं पृथि... ...भावव्याप्तिमद्भूतपाधा
वंतरत्वदृत्वामितिफलितं

परस्परसामानाधिकरण्यापन्नतादृशद्रव्यत्वादिस्वरूपसाध्याभावस्तोऽसंभवतिहेतावसत्वा
देवनोक्ताव्याप्तिरितिपरिहृदयानुदादोषांतरमाह॥ किंचेति॥ यत्तुसत्ताप्यपृथिवीसम
वेतत्वस्वरूपसामान्याभावस्यचाभावोऽनुगतप्रतीतिबलादतिरिक्तएवेतितन्मूलि
हेतोःसत्वात्सत्वाभावांनोक्ताव्याप्त्यव्याप्त्योःसंभवइत्यतः॥ किंचेति॥ तन्मंदं॥ इदानीमेवा
भावाभावस्यातिरिक्तत्वमंगीकृत्यतद्दोषनिरासेमूलत्वमूलेत्वान्यतरत्वावच्छिन्नाभावा
12 भावस्याप्यतिरिक्तत्वादन्येमूलत्वमूलेत्वेत्यादिनातिव्याप्त्यभिधानस्यसंदर्भविरोधापत्तेः॥
साध्याभावकूटाधिकरणवृत्तित्वस्यसंयोगसमवायादिप्रत्येकसंबंधेनप्रवेशमभिप्रे
त्याह॥ यस्मादावितीति॥ अव्याप्तिरिति॥ निर्वह्निसमवेतत्वसामान्याभावस्यैवयावदंतर्ग
तस्यधूमेऽसत्वादितिभावः॥ संबंधसामान्येनतादृशवृत्तित्वस्यप्रवेशमभिप्रेत्या
अत्रवह्न्यभावाधिकरणवृत्तित्वाभावस्यवह्निमत्कपालेघटेप्रसिद्धस्यधूमेअभावात्प्रसिद्धिःसंयोगेनैववृत्तित्वस्योक्तौसमवायेनकपा
लत्वेधान्यसमवायेनघटादिव्यक्ति[illegible]वृत्तित्वाभावस्यकपालत्वादेप्रसिद्धस्यहेतावभावादितिभावः

न्।। साध्यत्वेति।। कालादावित्यादिपदेन दिशः परिग्रहः।। व्यभिचारिणीति।। पृथिवीद्रव्यत्वादिसा
ध्ये।। ननु धूमवान् वह्नेरित्यादौ।। तत्र हेतुतावच्छेदकसंबंधेन वृत्तित्वविवक्षायामप्यतिव्या
प्तिः स्यात् धूमाभावाधिकरणकालदिगादौ महानसादेः स्वीयसंयोगसंबंधेन वृ[illegible]तेस्त
त्सामान्याभावस्य हेतुताघटकसं[illegible]योगसंबंधेन योवृत्तिमांस्तद्वृत्तित्वेन लक्षणाघट
कत्वादिति ध्येयं।। सत्तादीत्यादिना समवेतादेः साध्यस्योपग्रहः।। शंकते।। साधनेति।। तथा
च सद्धेतुस्थलेऽव्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव साधनसमानाधिकरणत्वात्
तत्संबंधाधिकरणवृत्तित्वस्याप्रसिद्धत्वाद् दृश्याभावस्मादयेव [illegible] लक्षणसंगतिः।। इत्थं च वृत्तिमत् ।।९८।।
वृत्तिपदस्य सार्थक्यं व्यतिरेकिण्य[illegible]पि संभवतीति द्रष्टव्यं।। यथा चैवं साध्यतावच्छेदके
स्य प्रतियोगितावच्छेदकत्वसार्थक्यं तथोपपादितं प्रागेव।। यद्यपि हेतुसमानाधिकर

णत्वं साधनसमानाधिकरणत्वस्य साध्याभावविशेषणत्वे वह्निसामान्याभावस्य लक्षणाघटकत्वात् वह्नित्वेन तार्णत्वाणीभयाभाववदधिकरण
च साधनसमानाधिकरणत्वस्य साध्याभावविशेषणत्वाद् [illegible] साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्न
धर्मावच्छिन्नाभाववदधिकरणवृत्तित्वाभावस्य [illegible] घटाभावाभावस्य घटत्वादिरूपस्योभ
भावच्छिन्नत्वोऽयमभावत्व [illegible] प्रतियोगितावच्छेदकव्यापकत्वस्य विशेषणत्वस्य सार्थक्यमिति भावः।। तेन तन्मेयत्वादिति ध्येयं।।
प्रवृत्तिसामान्याद्व्याप्यत्वे तत्र कस्य प्रतियोगितावसामान्यप्रतियोगिव्यापकत्वस्य विशेषणस्य सार्थक्यमिति

नत्वेन साध्याभाववतां निवेशे तादृशसाध्याभावकूटवद्वृत्तित्वत्वे प्रतियोगिताव्यापकत्वस्योपा-
दानं विफलं ॥ वह्निमान्धूमादित्यादौ आलोकावृत्तित्वावच्छिन्नाभावसाध्यायामव्याप्तिप्रसंग-
स्य तादृशाभावे साधनसमानाधिकरणसाध्याभावकूटाधिकरणवृत्तित्वत्वव्या-
पकप्रतियोगिताकत्वाभावादेव व्युदासात् ॥ न चानेकत्वे तादृशवृत्तित्वत्वस्य प्र-
तियोगिताव्यापकत्वमप्रसिद्धमेवेति वाच्यं ॥ तथा सति साधनसमानाधिकरणसाध्या-
13 भावकूटाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकस्य द्रव्यवृत्तित्वसामान्याभावस्यैव
स्पर्शवदन्यत्वहेतावसत्त्वाद्गगनमहत्त्वमूर्त्तत्वेत्यादिनाऽतिव्याप्तेरसंगत्यापत्तेः ॥ तथापि वृ-
त्तित्वालोकान्यत्वोभयत्वावच्छिन्नाभावस्यैव हेतुसमानाधिकरणसाध्याभावकूटाधि-
करणवृत्तित्वत्वव्यापकप्रतियोगिताकस्य धूमहेतावसत्त्वेन तन्मादायाव्याप्तिवारक-

[illegible] विशेषणेनैव व्याप्तिवारणे व्यासज्यवृत्तिधर्मावच्छिन्नत्वपर्याप्तत्वविशेषणस्यैव व्यर्थत्वादिति वाच्यं व्यासज्य
वृत्तिधर्मस्यानुगतत्वात्तेन [illegible] व्यासज्यवृत्ति पर्याप्त व्यासज्यवृत्ति
धर्मत्वेनानुगतेन रूपेण तेषां निवेशनीयत्वादिति ॥

तेनैव तस्य सार्थकत्वं ॥ न च पर्वतवृत्तित्व पर्वतान्यवृत्तित्वोभयत्वावच्छिन्नाभा
९९ वस्य व्युदास इति वाच्यं ॥ पर्वतवृत्तित्व पर्वतान्यवृत्तित्वोभयत्वावच्छिन्नाभावधारणाय
वृत्तित्वपर्याप्त्यासज्यवृत्तिधर्मानवच्छिन्नत्वेनैव प्रतियोगितायाः वक्तव्यत्वात् ॥ तादृश
प्रतियोगिताकत्वस्य च वृत्तित्वावच्छिन्नान्यत्वोभयाभावेऽपि सत्वादिति ध्येयं ॥ मूर्तत्व
मूर्तत्वान्यतरप्रतियोगिकाभावस्य केवलान्वयित्वात्तत्र साध्ये स्पर्शवदन्यत्वादिकं
सद्धेतुरेवेत्यत उक्तं मूर्तत्वान्यतरत्वेति ॥ तादृशेति । हेतुसमानाधिकरणमूर्तत्वमूर्तत्वोभ
यघटितसाध्याभावस्तोमस्तत्त्वघटित इत्यर्थः ॥ पृथिव्यादावित्यादिना नव्यमतेनोऽनिला
नोपरिग्रहः ॥ अत्र मूर्तत्वं विशेषगुणवत्वे सत्यात्मभिन्नत्वेन तु बहिरिन्द्रियग्राह्य ॥९६॥
जातीयविशेषगुणवत्वं ॥ मूर्तत्वमपि स्पर्शवदन्यमनोऽन्यतरत्वं जातिविशेषो वा ॥

ननु अवच्छिन्नपरिमाणवत्त्वं॥ तथासति मनःपरिमाणशब्दयोरेव साधनसमाना
धिकरणत्वाद्व्याससाध्याभावयोरैकाधिकरणाप्रसिद्ध्या अतिव्याप्त्यसंभवादिति
ध्येयं॥ ननु साधनसमानाधिकरणयत्किंचिद्व्यक्तिवृत्तिसाध्याभावकूटस्यप्र
निवेशान्नैष दोषः॥ कश्चिदपि स्पर्शवद्भिन्ने भूतत्वमूर्तत्वोभयोरसत्वात्तदुभ
यान्यतरघटितसाध्याभावकूटवत्प्रकारेण मनसि च हेतोः सत्वात्॥ यद्वस्तुतः स
14 मनियताभावानां मैक्यमते भूतत्वमूर्तत्वोभयान्यतरत्वावच्छिन्नाभाव एव भूतत्वम
नस्त्वान्यतरत्वावच्छिन्नस्य मूर्तत्वगगनत्वोभयान्यतरत्वावच्छिन्नस्य चाभावस्त
था च मनस्त्वगगनत्वयोरपि भूतत्वमूर्तत्वोभयान्यतरत्वावच्छिन्नाभावस्याभाव
त्वात्तु समानाधिकरणतदुभयघटितकूटाधिकरणाप्रसिद्ध्यैव नोक्तस्य ले

ऽतिव्याप्तिः॥ अस्तु वा यावंति निरूक्तसाध्याभाववत्त्वानि तावतां प्रत्येकावच्छिन्नस्य
१०० यदधिकरणं तद्वृत्तित्वाभाववद्वह्निमद्धूमयोः यावंतस्तद्धूमे व्याप्तिः॥ तथा च
भूतत्वमूर्त्तत्वान्यतरत्वाभावाभाववत्त्वावच्छिन्नस्याधिकरणं मनस्येव हेतोः स
त्त्वान्नातिव्याप्तिरत आह॥ किं चेति॥ ननु भूतत्वमूर्त्तत्वान्यतरत्वावच्छिन्ना
भावस्याभावोऽनुगतव्यवहारादतिरिक्त एव ननु भूतत्वमूर्त्तत्वोभयस्वरू
पस्तथा च साध्यसमानाधिकरणत्वादृशाभाववत्तिगगने मनसि वा हेतोः
सत्त्वान्नातिव्याप्तिरतः किं चेतीत्यपि वदंति॥ गुरुचरणास्तु॥ ननु यावंतो हेतुस ॥१००॥
मानाधिकरणाः पदार्थाः साध्यवद्वृत्तित्वव्यधिकरणधर्मावच्छिन्नाभावप्रतियो
गयाभाववंतस्तावत्पदार्थकृताधिकरणवृत्तित्वाभावाः वह्निमद्धूमयोः यावं

तस्तद्वत्त्वं विवक्षितं ॥ तथा च हेतुसमानाधिकरणयोर्गगनत्वमनस्त्वयोरेव तादृशप्र
तर्थयोरेकाधिकरणाप्रसिद्ध्या नातिव्याप्तिर्निरुक्तोभयाभाववत्तां घटत्वपटत्वादीना
मेकाधिकरणाप्रसिद्ध्या वह्निमान्धूमादित्यादावव्याप्तेः हेतुसमानाधिकरणयोर्यादृ
शमिलत्वयोः किं चेतीति प्राहुः ॥ कालान्यत्वसाध्यकस्य कालिकसंबंधेन हेतौ विरुद्धत्वादेव
15 लक्षनातिव्याप्तिरत उक्तं महेति ॥ तथा च महाकालान्यो घटादित्यादावित्यर्थः ॥ वृत्तिमान्मा
त्रस्यैवेति ॥ तथा च महाकालवृत्तित्व सामान्याभावस्य वृत्तिमद्वृत्तित्वाभावाभावाधि
करणधर्मावच्छिन्नाभावस्य च यावत्तद्धेतौ सत्त्वात् इति व्याप्तिरिति भावः ॥ अत्र केचित् ॥
सार्वभौममते सामानाधिकरणपदस्याव्याप्यवृत्तित्वोत्पन्ने कालावच्छेदेन घटादावेव वृ त्वं
त्तिमतिवर्तमानस्य महाकालवृत्तित्वसामान्याभावस्य पार्थिवत्वाद्यधिकरणावच्छेदेन हे

चिंतामणौ जं च नन्विसान्यसाध्यादौ साधनसमानाधिकरणस्य अधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य वस्तुभूतात्यन्ताभावाधिकरणस्य
व्याप्यवृत्तित्वाद् एतावन्मात्रेण कृत्स्नसिद्धेः॥ इदं तावच्च येऽपि हेत्वधिकरणताव्यापकत्वस्य विलक्षणे व्याप्ये तेषां तेति॥

तावत्सत्वोऽन्यातिव्याप्तिः॥ वृत्तिमद्वृत्तयोपाधेलक्षणघटः वृत्तित्वाभावाभाववद्वृत्त्यधिकरणा
१०७ वच्छेदे ~~तावत्सत्वान्नातिव्याप्तिः~~॥ तद्रूपस्य विवक्षितत्वात्॥ अत एव तद्रूपाभिन्नं गुण
त्वादिस्यादौ तद्रूपाभिन्नस्य समवेतत्वेन्वसमनियत प्रतियोगिताकस्य अधिकरणधर्मा
वच्छिन्नाभावस्यैवं वृत्तिमद्वृत्तित्वे पिनातिव्याप्तिः॥ तद्रूपावच्छेदेन गुणत्वादेव
वर्त्तमानस्य तद्रूपाभिन्नसमवेतत्वसामान्याभावस्य हेत्वधिकरणगुणावच्छेदेन हे
तावत्सत्वादित्याहुः। स्तच्चिंत्यं॥ परन्तु वृत्तिमद्वृत्तयपदस्य वृत्तिमद्वृत्तित्वसाध्याव
च्छिन्नप्रतियोगिकत्वविरहेणानिरूक्तोभयाधिकरणस्य हेतावसत्वान्महाकालान्यो ॥१०५॥
पदादित्यादौ नातिव्याप्तिः॥ न च महाकाले वृत्तित्वेनापेक्षणयोः कालिकसंबंधा
वच्छिन्नवृत्तित्वस्यैव महाकाले वृत्तित्वाभावप्रतियोगितावच्छेदकत्वयाम्महाकाल
तोभयानधिकरण~~...~~तत्सर्वत्र च महाकाले वृत्तित्वसामान्याभावस्यापि
साध्यवद्वृत्तित्वप्रतियोगिके

वृत्तित्वसामान्याभावश्चैतस्येन निरुक्तवृत्तिमद्वृत्तित्व। वृत्तिमद्वृत्तेः तस्य साध्यव
वृत्तित्वप्रतियोगिकत्वादिति वा—यं॥ यावंति कालिकसंबंधेन समानाधिकरणवृत्तित्वा
नि तावदन्यतमत्वावच्छिन्नाभावस्य तावद्भूर्सिकपक्तिं चिद्धुद्धि विशेषत्वावच्छि
न्नाभावस्य वा निरुक्तोभयानधिकरणस्य हेतावसत्वेन तथात्वाऽतिव्याप्तसंभवा
त्कालिकसंबंधावच्छिन्नवृत्तित्वत्वसम्बपेक्ष्य तावदन्यतमत्वलक्षणा स्वेऽभेद
16 स्यैवलाघवेन प्रतियोगितावच्छेदकत्वौचित्यादिति॥ ल—मं॥ तथापि नित्यपक्षेऽन
भिन्नत्वघटादिस्याद्दो विषयितासंबंधेन हेतावतिव्याप्तेर्वक्ष्यमाणत्वान्नि
त्यपक्षानभिमतत्वसामान्याभावस्याप्रसिद्ध्यावाधिकरणधर्मावच्छिन्नता
द्दृशविषयत्वाभावस्य च यावत्तत्वेऽहेतौ सत्वात्॥ न—पा रस्तु॥ साध्यतत्वसामा

घटपदिशाभिन्नत्वघटादिस्यादृवपित्व्याप्तिसंबंधेनित्यपदं व्यर्थं तथापि लक्ष्यत्वे व्याप्तिलक्षणस्यापि व्याप्तिस्तु च पितुं नित्यपक्षानपरमिति ध्येयं।

१०२ धिकरणावृत्तयो यावंतः साध्याभावाः साध्यसामानाधिकरण्यावच्छिन्नता
वच्छेदकाधिकरणवृत्तित्वाभावो विवक्षितः॥ तथा च व्यभिचारस्थले एवं सा
ध्यसामानाधिकरण्याभावघटितावच्छेदकसाध्यसामानाधिकरण्याप्रसिद्ध्या
नातिव्याप्तिः॥ यावंतस्तादृशाः साध्याभावास्तदवच्छेदकाधिकरणस्य न साध्य
वत्त्वं विवक्षितं। न च यावत्तादृशवृत्तित्वाभावस्य तु यावत्त्वं वृत्तिमद्वृत्तित्वे
नाभावे विवक्षितेऽपि पर्याप्तेः॥ इत्थं च साध्यसमानाधिकरणा यावंतस्तादृशाः सा
ध्याभावाः साध्या-प्रसिद्धौ तत्तदवच्छेदकाधिकरणवृत्तित्वमपि लक्षणं साध्यो ॥१०२॥
पहितिप्रायः॥ वस्तुतः पूर्वलक्षणे हेत्वाप्यधिकृतिमद्भवत्यो यावंतः साध्या
भावस्तत्तदपवृत्तित्वाभावाः तद्धेत्वावच्छिन्नाधिकरणतासामान्य
हृदयपदि लक्षणद्वयेऽपि ध्येयं

कृधर्मवत्वमेव व्याप्तिरित्यर्थः॥ तत्र वृत्तिमद्वृत्तित्वं च दैशिकविशेषणतयैव वक्तव्यमतो न को
पि दोषः पदमाद्धात्वघातत्वमिति दिक्॥ इति वृत्तिमद्वृत्तित्वं समाप्तं॥ ॥ एतेनेति॥ सह
कालान्योपरागादिसाधारणव्याप्तिप्रसंगेनेत्यर्थः॥ पर्याप्तमिति परेणान्वयः॥ अत्वाव्यं
ज्ञेयत्वात्सत्तावान् द्रव्यत्वादित्यादौ नानाव्यक्तिवृत्तिसाध्यकसद्धेतौ तत्तद्व्यक्तिवृत्तित्ववि
शिष्टसाध्याभावस्य तदन्यव्यक्तिवृत्तित्वविशिष्टसाध्याभावस्य च हेतोः साधनसमा
17 नाधिकरणयोरेकाधिकरणप्रसिद्ध्या साधनसमानाधिकरणप्रतियोगिव्यक्तिवृत्तित्ववि
शिष्टाभावरूपाधिकरणवृत्तित्वसामान्याभावाभावोऽहेतावसत्त्वेन वारत्वापत्तिस्तत्र प्रतियोगि
ताकालेयावच्छिन्नाभावविशेषणं॥ विशिष्टसत्ताभावान्ताते रिसादौ व्याप्तिसामानाधिकरणस्य सा
च्छिन्नत्वसत्त्वे व्यापकतावच्छेदकरूपावच्छिन्नाभावस्याधिकरणध्वंसावच्छिन्नाभावव

नियमाद्व्यक्तिमद्वृत्तेरत्वत्स्वरूपाधिकरणवृत्तित्वाभावस्य यावत्तेतोः सत्त्वादिति व्याप्तिरतः
१०२ साध्यतावच्छेदकावच्छिन्नेति ॥ तथा च गुणान्यत्वे कर्मान्यत्वाभाववत्तोरप्युक्तरूपाव
च्छिन्नप्रतियोगिताकत्वोक्तसमवायघटितस्वरूपाधिकरणाप्रसिद्धेर्वन्नातिव्याप्तिः ॥ अ
त्रापि येन संबंधेन व्यापकता तेनैव संबंधेनाभावोपि वेरप: ॥ तेन समवायसंबं
धावच्छिन्नव्यप्यभाववद्वृत्तिस्वरूपाधिकरणवृत्तित्वाभावस्य न स्वपवपवत्वा ॥ दिवि
ष्टस्य हेतोर्वस्तुतोपि वह्निसामान्याभावपर्वतत्वादिसत्वादेर्नाव्याप्तिः ॥ विशेषणतावि
शेषेण साध्यवत्ता पक्षतेला ह्रदासंबंधावच्छिन्नाभावाभावो व्याप्य इति तु न युक्तं ॥ ॥१०२॥
साध्यस्य गुणसामान्यस्याभावेऽन्याप्रघटत्वसंबंधविरोधात् ॥ गुणस्य देशि
कविशेषणतासंबंधेन गुणाव्यापकत्वात् ॥ यत्तु साध्यतावच्छेदकसंबंधेनैव

व्यापकत्वं तादृशसंबंधावच्छिन्नाभावं निवेशयति ॥ तत्तु न । वृत्तिनियामकसंबंधेन
साध्यतायां तदवच्छिन्नप्रतियोगिताप्रसिद्ध्याऽव्याप्तिप्रसंगात् ॥ एवमन्यत्रे रिसा
दावतिव्याप्तेश्च संयोगेन द्रव्यस्याव्याप्यवृत्तितया व्यधिकरणधर्मावच्छिन्नप्रति
योगिताकाभावस्य संयोगसंबंधावच्छिन्नद्रव्याभावानां व्याप्यवृत्तितात्कदाधिक
रणवृत्तित्वसामान्याभावस्य वृत्तिमत्वेः ॥ तादात्म्यसंबंधेन प्रमेयव्यापकतावच्छे
दकं यत्प्रमेयत्ववाच्यत्वादिकं तेन संबंधेन तदवच्छिन्नाभावाप्रसिद्ध्या तादात्म्येन प्रमे
18 यसाध्यकसद्धेतावव्याप्तिप्रसंगाच्च ॥ न च द्रव्यं घटादिस्तत्र कालिकसंबंधेन हेतावति
व्याप्तिः ॥ साधनसमानाधिकरणस्य द्रव्यत्वाभावकूटस्य कालिकसंबंधेनाधिक
रणे महाकाले हेतुतावच्छेदकसंबंधेन वृत्तिमात्रस्यैव वचनेरिति वाच्यं ॥ देशिकविशेष

१०४ णात्वयापावच्छिन्नाभावाधिकरणस्य निवेशनीयत्वादिति भावः॥ तत्र घटभिन्नं घटत्वादित्यादौ सा
ध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्याधिकरणीभूततत्तद्घटव्य
क्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावो घटत्वेपीत्यतउक्तं यावत इति॥ न च देशिकविशे
षणतासंबंधेन तद्घटभिन्नत्वाभावस्याधिकरणीप्रसिद्ध्येव नातिव्याप्तिः कथं यावत्त्व
विशेषणमिति वाच्यं॥ तथापि तद्घटान्यत्वप्रकारकप्रमाविशेष्यकत्वाभावस्यापि यावत्
दंतर्गतस्य साध्याभावस्य तादात्म्यसंबंधेन तदधिकरणीभूततत्तद्घटव्यक्तित्वस्य व्यधि
करणधर्मावच्छिन्नाभावस्य घटत्वेऽसत्त्वादतिव्याप्तिरतो यावत्त्वमिति॥ वह्निसंयोगा ॥१०४॥
भाववान् संयोगसामान्याभाववान् वा धूमादित्यादावव्याप्तिः॥ साधनसमानाधि
करणस्य साध्यव्यापकतावच्छेदकीभूतसंयोगसामान्याभावत्वा[illegible]वच्छिन्नप्र

सियोगिताकस्यवह्निसंयोगाद्यात्मकाभावकूटस्याधिकरणाप्रसिद्धेरतोव्याप्यवृत्ति
पदमित्याह ॥ केवलेत्यादिना ॥ केवलान्वयिनइत्यनेनसाध्यव्यापकत्वमाविष्कृतं ॥
संयोगादीत्यादिना ॥ वह्निसंयोगत्वाद्यवच्छिन्नाभावस्योपसंग्रहः ॥ तेनप्राचांमते
संयोगसामान्याभावस्यद्रव्येसत्वेपिनक्षतिः ॥ दैशिकाव्याप्यवृत्तिसाध्यकेप्रयो
जनमुक्त्वाकालिकाव्याप्यवृत्तिव्याप्यकेतदाह ॥ एवमिति ॥ ननुतादृशाकूटावच्छि
19 न्नप्रतियोगिताकत्वविशिष्टाभावानामेवलक्षणघटकत्वात्संयोगाद्यात्मकाभाव
सादायनाव्याप्तिरतउक्तमेवमित्यपिकेचित् ॥ नव्याप्यवृत्तिरिति ॥ तथाचगुणसामा
न्याभावस्यसाध्यनसमानाधिकरणत्वेपिव्याप्यवृत्त्यभावादेवगुणवान्द्रव्यत्वादित्या
दौनाव्याप्तिरन्यथागुणसामान्याभावस्यापिसाध्यनसमानाधिकरणसाध्याभाव

१०५ नयानन्वयित्वरूपाधिकरणसम्बन्धेन तत्साध्याभावस्य वृत्तिमतिनिष्ठेकत्वादेव
सिद्धस्य हेतुत्वे हेतावसत्ताद्व्याप्तिरेव स्यादिति भावः॥ स्वसमानाधिकरणेत्य
स्य व्याप्तित्वमाह। उक्तरूपेति॥ साध्यव्यापकतावच्छेदकरूपावच्छिन्नेत्यर्थः॥ केचि
दिति॥ वह्निमान्धूमादित्यादौ घटपटाद्यात्मकत्वं तद्विपक्षाव्यावृत्तितावच्छिन्नाभा
व कूटस्यापि निरूपकाभावतया तदधिकरणाप्रसिद्धिनिबन्धनाव्याप्तिवारणार्थमि
व स्वसमानाधिकरणेत्युक्तमिति भावः॥ न तु भिन्नं घटत्वादिदं वा व्यंशेपत्वादि
त्यादौ साध्यव्यापकतावच्छेदकरूपावच्छिन्नाभावकूटस्य नत्वेत छुट एव प्रासन्न ॥२५॥
स्तत्वाव्याप्त्यसंभवाद्वारकं चिदिदमुक्तं॥ अत्र च हेत्वधिकरणं यत्किंचिदुपक्रोदेशि
कविशेषणतयावच्छेमानत्वमेव हेतुसामानाधिकरण्यं बोध्यं॥ तेन पृथिवी

द्रव्यत्वप्रकारकप्रमाविशेष्यत्वत्वादिसाध्यके जलेतेजसि च साध्यसमानाधिकरण
स्यजलाद्यत्यन्ताभावस्यतेजोवृत्त्यभावस्यनिरूपकरूपावच्छिन्नप्रतियोगिताकत्वात्तदुभय
घटितरूपाधिकरणत्वात्साध्यादौहेतोरवृत्तित्वेऽपिनातिव्याप्तिः॥ हेत्वधिकरणजलादिप्रसे
कनिष्ठंयत्तादात्म्यंतदधिकरणजलादौहेतोःसत्त्वादितिभावः॥ उक्तसमुदायेसत्त्वादि॥
तादात्म्याभावसमुदायाधिकरणवृत्तित्वंहेतुतावच्छेदकसंबंधेनग्राह्यं॥ तेनद्रव्यभिन्नंसत्त्वादि
साध्येसाध्यसमानाधिकरणसाध्याभावकूटवतिमहाकालेवृत्तिसन्मात्रस्यैवकालिकसंबं
20 धेनवृत्तावपिनातिव्याप्तिः॥ तादात्म्यावृत्तित्वाभावस्तादृशावृत्तित्वत्वसमनियतप्रतियोगि
ताकोग्राह्यः॥ तेनपर्वतवृत्तित्वादिसामान्याभावस्यवृत्तित्वानौकान्यत्वोभयत्वावच्छि
न्नाभावस्यचहेतावसत्त्वेऽपिवह्निसामान्यस्यसाध्यत्वंक्षेपत्वादिसाध्येनासंभवः॥ अपिकम

१०६ मिहितं प्राह॥ वृत्तिमत्त्वस्यापि वृत्तिमत्त्वं हेतुतावच्छेदकसंबंधेन ग्राह्यं॥ तेन
संयुक्तसामान्याभावस्य समवायेन वृत्तिमत्तिजात्यादौ प्रसिद्धस्य हेतावसत्वे
पिवृत्तिसाध्यसमानाधिकरण्यादौ नाव्याप्तिरित्यर्थः॥ साध्यवत्ताज्ञाने विरोधिता घ
टकसंबंधेनैव रूपाधिकरणतायाः पूर्वमुक्ततायाः प्रकृतलक्षणघटकत्वोक्त
औद्धंकितं॥ इत्यादिकमित्यादिपदेन गुरोः प्रतियोगितावच्छेदकत्वमते तादृश
वृत्तित्वेनावच्छिन्नाभावाद्वृत्तिमद्भिन्नयोर्यावन्तस्तत्त्वमित्यादेः सूचनं॥ अभा ॥१०६॥
वत्वच्छेप्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानत्वेन हेतुतायाः स्वरूपसंबं
गीकाराभावार्थमाह॥ विशेषणेति॥ ननु घटत्वेन पटो नास्तीत्यादिबुद्धेर्घ
टत्वादिविशिष्टवैशिष्ट्यविगाहित्वमेवासिद्धमत आह॥ अभावेति॥ नन्वा

तं चैत्रेणेति ॥ न घटत्वादेः प्रतियोगिवृत्तित्वमविषयीकृत्येत्यर्थः ॥ तद्धर्मावच्छिन्नप्रति
योगित्वसंसर्गकाभावबुद्धेः तादृशसंबंधेन तद्धर्मविशिष्टवैशिष्ट्यावगाहित्वनि
स्यावश्यंभावादिति भावः ॥ ननु तत्तद्घटत्वेन घटो नास्तीत्याकारकसमानाधिक
रणधर्मावच्छिन्नाभावप्रसक्तेर्व्यभिचारान्नोक्तनियमः इत्यत आह ॥ घटो नास्ती
त्येवेति ॥ तथा च विशेषधर्मेण सामान्याभावो प्रसिद्ध एव तत्तद्व्यक्तित्वेन घटो नास्ती
तिप्रतीतेर्घटतद्व्यक्तित्वाभावसामात्रावगाहित्वात्तत्र हेतुत्वाभावादेव न व्यभिचारः ॥ अ
न्यथा सामान्यधर्मेण विशेषाभावस्यापि स्वीकारापत्तेः वाच्यत्वेन घटो नास्तीत्य
21 पि प्रत्ययप्रसंगादिति भावः ॥ प्रकृते योऽन्वयतीति ॥ तदिहेति ॥ इह घटत्वेन पटो नास्ती
ति अभिलप्यमानस्य तस्य व्यधिकरणधर्मस्य ॥ अथावगाहत इति ॥ व्यधिक

धर्मेण विशिष्टं प्रतियोगिनमित्यनेनान्वयः॥ न च लल इति। प्रमाया एव अर्थसाधनकत्वा
१०७ दिति भावः॥ ननूक्तव्याप्तेरप्रयोजकत्वाद् घटत्वादेः प्रतियोगिवृत्तित्वमनवगाह्यापि तद
वच्छेदकत्वावगाहिप्रत्ययसंभवाद् अधिकरणधर्मावच्छिन्नाभावः सेत्स्यतीत्यत आह॥
यदि तु न इति॥ स्वरसवाही यथार्थः॥ स च पटे घटत्वानवगाहमान एव संभवतीति
भावः॥ घटत्वेन पटो नास्तीत्यादिपदेन घटत्वेन द्रव्यं नास्ति द्रव्यत्वेन पटो नास्तीत्याद्यन्तु
भावस्योपग्रहः॥ तु अनुगम्यात तद्वृत्तिधर्मेण तस्यैव विशेषणरूपेण सामान्यस्य सा ॥१०७॥
मान्यरूपेण विशेषस्याभावे बाधकाभावादिति ध्येयं॥ घटत्वेन घटो नास्तीति पाठे च
घटत्वेनेत्यस्य घटत्वत्वविशिष्टेनेत्यर्थः॥ तेन तद्रूपेण प्रतियोग्यंशे घटत्वविशेषणानवगा
हि समानाधिकरणधर्मावच्छिन्नाभावप्रत्यक्षत्वेनोक्तनियमस्य व्यभिचारो दर्शितः

०यु० लैः॥शुक्रः पाराशरः शुक्रो द्विपदा विराट्॥शुक्रावाहने वि०ॐ शुक्रः शुशुक्वां उषो नजा०
।२॥ भूर्भुवः स्वः भोजकटदेशोद्भव भार्गव सगोत्र शुक्रेहागछेह तिष्ठ शुक्राय न०॥६॥पश्चिमे
धनुषाकृतिं गुल्ले मंडले प्रत्यङ्मुखं शनिं कृष्णपुष्पाक्षतैः॥शमग्निरिरिं बिठिः शनिश्च
रउष्णिक्॥शनैश्चरावाहने वि०॥ॐ शमग्निर[illegible]भि०॥भूर्भुवः स्वः सौराष्ट्रदेशो भि
द्भव काश्यप सगोत्र शनैश्चरेहागछेह तिष्ठ शनैश्चराय न०॥७॥[illegible]नैर्ऋत्यं शूर्पाकारद्व
१ भि दशांगुल्ले मंडले दक्षिणामुखं राहुं कृष्णपुष्पाक्षतैः॥कयानो वामदेवो राहुर्गायत्री॥रा
ह्वावाहने वि०॥ॐ कयानश्चित्र०॥भूर्भुवः स्वः राठिणापुरोद्भव पैठीन सगोत्र राहो
२२ हागछेह तिष्ठ राहवे न०॥८॥वायव्ये ध्वजाकारं षडंगुल्ले मंडले दक्षिणामुखं केतुं धूम्रपु
ष्पाक्षतैः॥केतुं कृण्वन्न मधुछंदाः केतुर्गायत्री॥केत्वावाहने वि०॥ॐ केतुं कृण्वन्न०॥ सं
भूर्भुवस्वः अंतर्वेदि समुद्भव जैमिनि सगोत्र केतो इहागछेह तिष्ठ केतवे न०॥९॥आदित्या॥२

भूर्भुवःस्वः यमुनातीरोद्भव आत्रेयसगोत्र सोमेहागच्छेहतिष्ठ सोमाय० सोममावाहयेत्॥०
॥२॥ दक्षिणे त्रिकोणे त्र्यंगुले मंडले दक्षिणाभिमुखं भौमं रक्तपुष्पाक्षतैः॥ अग्निर्मू
र्धा विरूपांगारको गायत्री॥ अंगारकावाहने वि०॥ ॐ अग्निमूर्धा दि०॥ भूर्भुवः स्वः
अवंतिसमुद्भव भारद्वाजसगोत्र भौमेहागच्छेहतिष्ठ भौमाय० भौममावा०॥ ३॥ ईशाने
बाणाकारे चतुरंगुले मंडले उदङ्मुखं पीतपुष्पाक्षतैः॥ उद्बुध्यध्वं सौम्यो बुधो बुध बुधं
स्त्रिष्टुप्॥ बुधावाहने वि०॥ ॐ उद्बुध्यध्वं समन०॥ भूर्भुवः स्वः मगधदेशोद्भव आत्रेयस
गोत्र बुधेहागच्छेहतिष्ठ बुधाय०॥ ४॥ उत्तरे दीर्घचतुरस्रे षडंगुले मंडले उदङ्मुखं बृह
स्पतिं पीतपुष्पाक्षतैः॥ बृहस्पते शौनको गृत्समदो बृहस्पतिस्त्रिष्टुप्॥ बृहस्पत्यावा
हने वि०॥ ॐ बृहस्पते अतियद०॥ भूर्भुवः स्वः सिंधुदेशोद्भव आंगिरससगोत्र बृहस्पते
हागच्छेहतिष्ठ बृहस्पतये०॥ ५॥ पूर्वे पंचकोणे नवांगुले मंडले प्राङ्मुखं भृगुं शुक्लपुष्पाक्ष

१०८ तादृशाभावेति॥स्वसमनियतान्यधर्मावच्छिन्नप्रतियोगिताकाभाववारणमित्यर्थः॥तेनसा
मान्यरूपेणविशेषस्यविशेषरूपेणसामान्यस्यचाभावसंग्रहीतः॥यत्तुद्रव्यत्वेननघटोनास्तीति
प्रतीतेर्घटत्वावच्छिन्नाभावेनैवोपपत्तौसामान्यरूपेणविशेषाभावादौमानाभावइतिप्रागेव
दूषितमिति॥यद्यपिसंयोगादिसंसर्गकघटत्वाद्यवच्छिन्नाभावत्वावच्छेदेनगगनादावप्यसं
बंधेनघटत्वाद्यवच्छिन्नस्यविरोधित्वकल्पनात्॥संयोगेनघटादिमतिघटत्वाद्याप्यघटाद्यभा
वासंभवादितिकेचिदूचुः॥तदपिमंदं॥तावतापिघटादिमतिघटादेःगगनत्वादिनाव्यत
त्वादिनाशैयत्वादेश्चव्यधिकरणधर्मावच्छिन्नाभावस्यदुर्वारत्वादितिगगनादेरधिकरणस्य ॥१०८॥
स्वरूपसंसर्गकत्वाव्यतत्वाद्यवच्छिन्नाभावस्यचाप्रसिद्धत्वेनविरोधस्यकल्पयितुमशक्य
त्वादितिदिक्॥ ॥व्यधिकरणधर्मावच्छिन्नाभावेसमाप्तोयंजागदीशि॥ ॥जगदीशकृता
व्याख्याऽनुमानमणिदीधितेः॥गर्भाकृताणुसिंदुप्रेराहितःपंचक्रमसी॥ ॥ ॥ ॥ ॥ १ ॥

२५

॥जागदीशीसमाप्तः॥

पाक्ष